नः आरुणिनः तांडिनः श्यामायनिनः अत्र प्रत्यत का विग्रहणं कनेवर्मिति कातिकं छान्दसि अग्रणान पिलोकसि

१ ७
००३

ध्यवहारदर्शनात्स्यादेतत्किमापवाद्यंतेवासिपदेन ग्रहणमित्यतदर्थः भाष्यकारास्तु कलापिग्रहणमेवाव्लिंगं
ग्रन्थस्याकलापिनो वैशंपायनांतेवासित्वात्कलाप्यंतेवासित्वात्कलाप्यंतेवासिनोपि वैशंपायनांतेवासित्वादेव
णिनु सिद्धं स्यात् एवं शौनकादिभ्यश्छंदसि इत्यत्र ग्रहणं ज्ञापकं हरिद्रावोपीह लिंगम् ग्रन्थस्याकरस्य वैशंपायनांतेवासित्वात्
ढं कलाप्यंतेवासिनोपि वैशंपायनस्य वैशंपायनांतेवासित्वादेव सिद्धिः स्यादिमाहुः॥ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥
ब्राह्मणानि कल्पाश्चेति द्वंद्वः विशेषणं च पुराणप्रोक्तेष्वा च्येव तेषां तानस्योक्तमित्यर्थे णिनिः स्यात् भल्लुना प्रो-
क्तमधीयते भाल्लविनः एवं शाट्यायनेन प्रोक्तमधीयते शाट्यायनिनः पिंगेन प्रोक्तः पैंगी कल्पः पुराणेति किं याज्ञवल्क्येन
प्रोक्तानि याज्ञवल्क्यानि ब्राह्मणानि आश्मरथ्येन प्रोक्तः आश्मरथः कल्पः याज्ञवल्क्याश्मरथ्यशब्दौ गर्गादिषु यञन्तौ
नाम्ना मणा आश्मरथस्येति यल्लोपः याज्ञवल्क्यादयोर्वाचीना इति संप्रदायः अतस्त्वेवादिरूपसंबंधिनाणिप्रयोगः
कण्वादित्वप्रयुक्तस्याणो ब्राह्मणपुरस्कारेण विध्यभावात्॥ शौनकादिभ्यश्छंदसि॥ कठचरकाल्लुक्॥ कठो वैशं-
पायनांतेवासित्वाण्णिनिः चरकादपि गर्गादेरण् तयोर्लुक् कठेन प्रोक्तमधीयते कठाः चरकाः॥ कलापिनोऽण्॥
वैशंपायनांतेवासित्वप्रयुक्तस्य णिनेरपवादः कलापिना प्रोक्तमधीयते कालापाः नच इनण्येन इति टिलोप
निषेधापत्तिः नांतस्य टिलोपे सब्रह्मचारिप्रभृतीनामुपसंख्यानस्य वक्ष्यमाणत्वात् नच कलापिन इमे तावंते वाऽत्सर्गि-
कस्याणोऽत्राभिसंभवात् पुनरणग्रहणं वैयर्थ्यमिति वाच्यम् अधिकविधानार्थं तेयथा बाधकबाधनार्थत्वं पर्यवसानात्
तेन माथुरेण प्रोक्तेन माथुरीयमिति वृद्धाच्छं बाधित्वाण्॥ एवं मौदाः पैप्पलादाः शाकलाद्यस्य चमसु दपिप्पलादश्च
कल्पेभ्यः पुराणप्रोक्ते छिन्नेरिति णिनिं बाधित्वाण्॥ छगलिनो ढिनुक्॥ कलाप्यंतेवासित्वात् णिनेरपवादः छ-
गलिना प्रोक्तमधीयते छागलेयिनः॥ पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः॥ मद्वक्ष्यमाणिनेरपवादः इति अत्रा

४ विकं देवग्रहणमनुवर्त्त्यम् तद्विषयत्वलाभार्थं एवमुत्तरसूत्रेपि भिक्षुनटसूत्रयोरुपचारेणेदस्तम् भिक्षुः सं मा।
सि. सु. मीत तत्सूत्रं वेदांतशास्त्रम् पाराशर्येणप्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः आपत्यस्येति यलोपः शिला
७२ लिना प्रोक्तमधीयते शैलालिनो नटाः नलाद्धितइति टिलोपः अत्र च पाराशर्यशैलाली तत् ॥ कर्मंदकृशाश्वादिनिः ॥ भिक्षुन
टसूत्रयोरित्येव कर्मंदेन प्रोक्तमधीयते कर्मंदिनो भिक्षवः कृशाश्वेन प्रोक्तमधीयते कृशाश्विनो नटाः अत्र च कार्मंदं।
कार्शाश्वम् ॥ तेनैकदिक् ॥ तेदसीति निर्दिष्टमेतुनस्तेनेत्युक्तेः एकदिगिति बहुव्रीहिः एकत्वसजातीयत्वम् सुदाम्ना अद्रिणा
एकादिग्यस्याः सा सौदामनी विद्युदिति महतिभावः सुदामाख्यपर्वतेनैकदिक्मदेशादिकमुक्तेति बोधः समेहेन वर्द्धिका
कारः ॥ तसिश्च ॥ उक्तविषये स्वरात्मतः स्वरादित्वादव्ययत्वम् एवं पीलुमूलेन एकदिक् पीलुमूलतः ॥ उरसो यच्च ॥ चात्तसिः
उरसा एकदिक् उरस्यः उरस्तः ॥ उपज्ञाते ॥ तेनेत्येव उपज्ञातमित्यर्थे तृतीयान्ताद्यथायथं प्रत्ययाः स्युः पाणिनिना।
उपज्ञातं पाणिनीयं उपदेशेनैव स्वप्नेणज्ञातमित्यर्थः ॥ कृते ग्रन्थे ॥ कृतमित्यर्थे तृतीयान्ताद्यथायथं प्रत्ययाः स्युः ग्रन्थविशे
षे वररुचिना कृतो वाररुचो ग्रन्थः संज्ञायाम् ॥ तेनेत्येव अग्रन्थार्थ आरंभः मक्षिकाभिः कृतं माक्षिकं मधु सारघम् ॥
कुलालादिभ्यो वुञ् ॥ तेन कृतमित्यर्थे संज्ञायां कुलालेन कृतं कौलालकं वारुडकं कुलाल वरुड निषाद चण्डाल
कर्मार सेना देवराज परिषत् वधू रुरु ध्रुव अनडुह् ब्रह्मन् कुम्भकार श्वपाक ॥ क्षुद्राभ्रमरवटरपादपादण् ॥ एवं विष
ये क्षुद्राभिः कृतं क्षौद्रं भ्रामरं वाटरं पादपम् पादपशाखाक्षसामयाणोऽपवादः स्वरे विशेषः ॥ इति श्रीसिद्धान्तसुधा २१
निधौ चतुर्थाध्यायस्य तृतीयपादे पञ्चममाह्निकम् ॥ १ ॥ तस्येदम् ॥ अणादयः पञ्चमहोत्सर्गा घादयश्च षष्ठ्य
न्तादस्मिन् विषये स्युः उपगोरिदमौपगवम् इह संबन्धत्वेन रूपेण संबन्धः प्रत्ययार्थः तस्याश्रयत्वेन वस्त्रादाववसायः त
था च नमजनकभावादेरपि संबन्धत्वेन विवक्षायां दाशरथ्यादेस्तादात्विणः अपत्यत्वादि प्रकारकबोधनामर्थे।

त्विमारयतीति विवेकः । इहच्छंदनमात्रं यत्कृतिनेनतत्युक्तम् इति येगिमात्रेच प्रमत्यार्थेनेन विवतितेन लिंगसंख्योप्रमयपरो
हारिकत्वनेयं नेनपार्थः । समादिसिद्धम् देवदत्तस्पंदमनेनतरमिमाद्देत्वनभिधानात्, सर्वहेस्त्वरणाद्दुवधकः ।
श्रणासिद्धावपि इत्येतु पसंख्याने हृविति सन्नव्योः सामामग्रहणम् सेवाकुः संसावहित्रे इति कर्तेष्वेदतारीनाम
सिद्धनाद्लौकिके प्रक्रियावाको इत्येवमिद् ततोप्यसरत्वाभावात्प्रद्धत्वादि, अग्नीधः शरणे रण् भं च वक्तव्ये अग्निधि
धे अग्नीन्धे तत्र भोवितण्यवत्वादिधेः सकर्मकत्वम् होत्ववचनाश्रयं तस्माच्छरणमाग्नीध्रः भवानं संधवं होमसिद्धा
नै^ गीथपदत्वात् स्यात् समिधामाधाने षेण्यण्वक्तव्यः प्रतिष्ठी प्रथमा कापोहृश्य धः समिधमाधीयते नेनेति सामिधे ण^
नोमंत्रः सामिधेनीऋक् हलसनङितस्येति यलोपः । सत्याञ्चत्, सर्वेगेः इति वक्तव्यम् सर्वे वर्के सर्वसीतहले स्यापदृष्टे
तदंत विधेरुपसंख्यानामसमर्थ्ये उत्तमसर्थ्ये प्रत्यवदेति हृद्यौरसर्वेरेगमिति विग्रहे तद्धितविवक्षायां तद्धितार्थेति
द्विगौकृते तदुत्तरे पनत् द्वैरथ्यो वहतीम्यत्रापि तद्वहतीत्यनेन यत् अर्थेन विशेषः आग्नेयायहेति पताकान द्विगोर्लुग
नपत्येइतिलकिद्विरथम् द्वितीयवतुगासंहीयवतीयत्वाभावात् द्वैरथ्यमितिरूपम् नचापेयित्वतेजादित्वाभावात्लुने
तिवाच्यम् तद्वहतीमत्ररथ्यग्रहणसामर्थ्यात् यत्रादित्वाभावेपिलुक्यसक्तेः श्रयत्यात्रसमस्ये वयतो रथं गास्यवो
कुरथ्यस्य सामिधानो विमात् तत्ररथ्यग्रहणपरिमाणेल्लाघवमस्फुटत्वात् इत्याहुः तद्विमम् हलश्रीहसाहवर्षो
नदंतविधेरुपसंख्यानेनसमासेवयतो ग्रहणेन तत्तद्वहतीत्यनेन विहितस्येति पदस्यैकेपदेन तत्रबसमाणत्वात् उक्त
कलनस्पगर्भस्ताचवर्णगतत्वात् ॥ यथास्वींदत्त ॥ पथेवाहनेनतस्यवीदृग्यशाह्रादस्य प्रतोपवादः तदंतविधिनात्स्यापि
प्रसक्तिसत्त्वात् श्रयत्यसेदमाः ॥ रथम् ॥ यत्राधुप्रपतिवदस्थ ॥ अन् पत्याहाद्वारेइतिवक्तव्यम् श्रयस्येदंवहनोयमायश्व
२ त शाधषेवपारिषदे अणोपवादः ॥ हलसीराहृक् अणोपवादः हालिकसैरिकम् ॥ हंहाद्वैरमेधुतिकयोः ॥ मेधु

५ त्रिकाविवाहः काकोलूकिका नित्यं वैरिवैरमित्यर्थः अत्रिभरद्वाजिकानयोर्विवाह इत्येवमर्थः देवदेवासुरा
सि कृ. दिभ्यः प्रतिषेधः दैवासुरम् ॥ गोत्रचरणाद्वुञ् ॥ अणोऽपवादः ह्वसानेन परस्माद्दायः ग्लौचुकायनकं यस्मात्तु माम्नाय।
योरिति वक्तव्यम् कठस्यायं काठको धर्म आम्नायो वा ॥ संघाङ्कलक्षणेष्वञ्यञिञामण् ॥ अत्र तत्र पक्षे तावदिङ्गे नैताद्व
१५९ 73 द्वकार्षेयगुण दोषग्रहणमपि कर्तव्येमेन यथा संख्याभावः कर्मण्योद्वाह यत्रो विसनामयैवेदः संघाङ्को लक्षणं घोषा ?
का गार्गः हाहः परस्मदास्येयंकः यथा गवादिभ्यः सातान्नेये धेलक्षणे यथा विधानो विधाणि नेडीवर्यंष्ठं कस्मवा।
निषेधार्थेव वैदीविषायस्यस्यैव दीविद्यः हृद्दिनिमित्तस्येति नञ्चवत् विदानाम साधारणी या विद्यानदानिस्थः॥
शाकलाद्वा॥ संघादिषु येषु शाकलेन प्रोक्तं वेदमधीयते विदन्ति वा शाकलाः प्रोक्तादिमणो लुक् शापस्य सेतिष
लोपः तेषां संघादिः शाकलः पैत्तचरणाद्वुञ् शाकलकः ॥ छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः॥ संघे सादि।
निवृत्तम् चरणादित्येव धर्मादावधर्माम्नाययोरेव छन्दोगानां धर्म आम्नायो वा छान्दोग्यं औक्थिक्यं याज्ञिक्यं वा।
ह्वृच्यं नाट्यम् ॥ न दण्डमाणवान्तेवासिषु ॥ दण्डप्रधाना माणवा दण्डमाणवाः शैत्रवासिभिर्दहो गोत्रनान्नाम यमवुञो निषे।
धः दाक्षेः इमे दाक्षा दण्डमाणवाः शिष्या वा ॥ रैवतिकादिभ्यश्छः ॥ तस्येदमित्यर्थेषु नोपवादः रैवतिकीयः वैजवापीयः
रैवतिक वैजवापि खौपिशिक हैमधन्वि गौरग्रीवि औदमेघि औदव्रजि नाभिवाक वापि॥ कौपिञ्जलहास्तिपदादण्वक १५
ञः कपिञ्जलस्य हस्तिपादस्य चापत्यमित्यस्मादेव निपातनादण् पादः पदितिपक्षाव गोत्रप्रत्ययान्तादिदं विधानम्
गोत्राधिकारात् कौपिञ्जलहास्तिपदादणिति सूत्रे चैव पाणिनीयमिति केचन प्रवरत्वेन कौपिञ्जलः हास्तिपदः ग्र
कर्मणो गोत्रलक्षणस्य चरणलक्षणस्य वुञोऽपवादः ॥ आथर्वणिकस्येकलोपश्च ॥ अण् चरणाद्वुञोऽपवादः आथ
र्वणिकस्यायं आथर्वणो धर्म आम्नायो वा भाष्यकारास्त्वाहुः तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्तव्यः वसिष्ठो

नवाकः अथर्वणो वेति वक्तव्यम् अथर्वणा प्रोक्तो वेदोऽथर्वा आथर्वणो वा तमधीते आथर्वणिकः दाण्डिनायनादिसूत्रे इति
पातनादि टिलोपाभावः तथा चोक्तम् सूत्रे नकलत्वं अथर्वणा प्रोक्तस्याथर्वणस्य वाथर्वणिकत्वम् प्रसूतत्वात् धर्मवदाम्नायस्याथर्व
णस्य तु सूत्रेन अत एव आथर्वणाश्रितस्य निष्पाणत्वात् वसन्तादिपाठाच्चाथर्वणिकः ॥ प्राग्दीव्यतोऽण् समासः ॥ तस्य विकारः ॥ आत्म
प्रस. नः मार्त्तिकः अश्मनो विकारे टिलोपो वक्तव्यः आश्मः भस्मनो भास्मः शब्दो मत्स्यादिना वाच्यः प्रातिका अश्मनो पित्विकारे तत्वात्
प्रत्ययः स्थितिपदविधानाभावात् प्राणिरजतादिभ्यो नाडिप्रभावत्वेन तुल्यस्य माणवकादीनामन्तर्भवेऽप्यवश्याशब्देनेतम् तस्य
ग्रहणे विकारावयवयोर्वादि तिङ्हम सर्वेषु तेषामधिकारात् प्रकृतिः तस्येदमिति वचनाद्धा नाद्यः प्राधिकारात् प्रमाणानां तस्य
ग्रहणे तन्निष्ठमावपि तस्येदमित्यनेन प्रसङ्गात् नोमः तदाचैतन्यात् सर्वविनाशित्वात् मैवं वाहिं स वद्ध तस्य ग्रहणस्यानिष्ट
मर्थोत्तरोरितग्रहणात् तस्येदमित्यनेनापि ह्राटो नामत्रयमतेः अस्य यातन्निवर्तते नैवमर्थात् प्राधिकारे गोतस्येदमित्यनेन वा
वादीनामुत्सर्गविशेषाभावात् तथाणादीनामेवविहिमिरत्व ततयादीनां विनियमकार्यवादितिवाच्यम् अवधिविशे
षाणुपेयणतेषां विहितत्वात् सर्वे च देवादिबाधनार्थम् तस्येदमित्यत्राणादयो प्रतयस्याणापवादा विहिताः विकारावय
वयोस्त्वर्थयोरणादयः पवनन्त तदपवादाद्याश्च इति अस्त्येतस्मिन् तस्येदमित्यन्तर्भावात् विकारादिविशेषः इति तथाप्ययं
अस्मेवं तु नयोमत्ययेनादस्समार्थके तथापि योगविभागसामर्थ्यमप्रतीतत्वात् योगविभागाभावे विल्वादिभ्योऽणि
कार इत्यत्र प्रकृतिविशेषमवहत्येव विकारसमयमयविधानुपयोगात् प्रकृतिसामान्ये सर्वेवधीविकारः शेषपवस्थान् यो
गविभागस्त्वेन तत्सेतिसर्वेनामवत्वात् प्रकृतिसामान्ये वयिनोपि विकारस्याविधानुपयोगात् ह्येयनेनात्रातिनत्वादिभ्य
प्र. स्मणः अप्राप्त्युत्पमानमेवबाधनात् अवयवविषयः पतनमत्र विहितो ण निरपवादः योगविभागसामर्थ्याद्बिल्वादीनाति
दयनात् अस्य यातस्येदमित्यनेनैव वादिसम्बन्धितस्याणो विकारे पि सिद्धेः इदशब्देनाद्यातनाणामिव विकारस्यापि संग्रहोऽयम्

५ नेः तथा च हलसीराभ्यामौत्सर्गिके प्राग्दीव्यतीये विधीयमानो हलसीराभ्यामिति ठक् द्वितीयः तस्य तृतीयकद्वाचामोय
सि.दृ. मणएवाहः हलशब्दो हि न विषयेऽस्मादुदात्तः सीरशब्दोपि स्वरं तत्त्वात् तथा चानुदात्तादेरेञोऽपवादत्वात् अस्मा
णौनपवादत्वेऽस्य हलीनो विकाराः समयतस्येदभिमणएप्रथमः अहहादयीतित्वन् द्वितीयः सदृशोः कन् तृतीयः
स. समयत्वादनेन न बाध्यते वार्थ इति हलेः कितृ शेणो नोदात्तविकल्पात् आद्युदात्तत्वपक्षेण अनोदात्तपक्षेव अनुदात्तादि
74 त्वादञ् त्रिसर्गे शब्दो बहुव्रीहित्वात्स्वरेण प्रकृतिस्वरेणाद्युदात्तः तत्राणु प्रथमः तत्पदलत्वणोवुञ् द्वितीयः गर्तो
विहितं तत्पदलत्वणोऽस्य तृतीयः तदवयिरहणोवुञ् चतुर्थः तस्मायमणएवाधकः त्रियतीनो विकारे हेयर्तः रहूणोविका
रोकवः इमयलणएप्रथमः तदयवादेहृदादयीतित्वन् गोरे शेषोः निदम्त्वा द्वितीयः कोपयताकक्कादितावदाणएतृती १
यः मत्रुष्यतस्यपो रितित्वच चतुर्थः नैव विकाराणए परत्वाद्वाधकः प्राहषो विकारः प्रा एमयरस याएय
प्रथमः कालाद्वुञ् द्वितीयः स्वणए तृतीयः शाहषएएप चतुर्थः विकाराणएपञ्चमः तवाधिवानि सहरेलिषष्ठो मयट्
नेपव मावाचार्यो इति भाष्येत्वेषविकाभिप्रायमिति कियट् कोपधाचेमणए गोत्रन् अनुदात्तादेश्चेति सूत्रद्वयविहित
माणोवाधकोनेतमयटः परत्वान्मयूटएवतद्वाधकत्वात् अवयवेव प्राणौषधिवृक्षेभ्यः पम्पो विकारेवयवे च यथो ५८
काः समयाः शु मायूरः प्राणितज्ञताद्यिभ्यः इमञ् यथ अनुदात्तादिश्च उदात्तादेश्चमेवाञ् सिद्धः तथापि उदात्तायंर्ष्
हृदेष्ट मयूरा धात्येवेद अनुदात्तादिश्वपिपरत्वाद्सयहतिनिमदेनत् सूर्वीयाविकारो वयवेवा कामोर्वेकारईमस्त्वा
दणधात्नोव यथामिमाय्रदात्तो सर्वीशब्दः येप्पले लवावेनेहयोस्तनिपिप्पलशब्दमाद्युदात्तः तयोरमः पिप्पलेरवा
हृतीति मेमेवतयेवमयोगात् वस्माणः पमयाः शाणिपधिहृत्वेभ्यो विकारावयववयोरमेभ्यस्त्व विकारमावेर
निविवेकः ॥ बिल्वादिभ्योऽण् ॥ अनुदात्तादेरमो हरोमयटोपवादः बिल्वस्य विकारोवयवो वा बैल्वः बिल्वब्रीहि मुद्र

मसूर गोधूम वेणु इक्षु गवेधुका पाटली कार्पासी कर्कन्धू कुटीर॥ कोपधार्थ॥ सूत्रद्वयविहितस्याणोऽपवादः तर्कोरवयवो विका
रो वा तार्कवम्॥ तैत्तिडीकं मध्योदात्तत्वा दनुदात्तादित्वम्॥ उवर्णान्ताः पृकु॥ अणोऽनियोगेन ह्यपोः शुक्र मधुस्तो जन्तुनो वा विका
रः आण्डषं जानुषं ओरञोऽपवादः ओरञ्॥ अणोऽपवादः दैवदारवं भाद्रदारवम्॥ अनुदात्तादेश्च॥ दाधित्थं कापि
त्थे स्वापित्थमिति कः उपपदसमासः इषादरादित्वान्मध्योदात्तत्वे कृन्मतपदप्रकृतिस्वरेणाणो न्तोदात्तत्वादनुदात्तादित्वम्॥ प
लाशादिभ्यो वा॥ पलाश॥ उभयत्रविभाषेयं पालाशं कारीरं पलाश खदिर शिंशपा स्पन्दन करीर शिरीष यवा
स विकङ्कत पलाश शब्दौ हृतादित्वात् स्पन्दनशब्दौ युजन्तत्वात् तूदात्तः करीरशिरीषशब्दौ ईरन्प्रत्ययान्तत्वान्नित्स्वरेण
मध्योदात्तौ विकङ्कत शब्दः यवासशब्दो घञाद्यन्तत्वादाद्युदात्ताः॥ शम्याः ट्लञ्॥ अनुदात्तादेश्चेत्यस्यापवादः शाम्याः विका
रः शामीली स्रुक् लञ् आदेः षकार इत्संज्ञके टकार इत्संज्ञे आयेङीप् श्रेयसे ङीप् इति ङीप्रत्ययस्वरे विशेषः वैदि
कप्रयोगदर्शनाभिप्रायेणेदं नित्येयमिमाहुः॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ प्रकृतिमात्रान्मयट् विकारे अवयवे वार्थे
प्रत्यके यदर्थे देयला अभिप्रेततयोरिति कथनं प्रमयविशेषविधेयपि मयड्विधानार्थम् कपोतमयं कापोतम् अश्म
मयं आश्मनम्। अभक्ष्येत्यादि किं मौद्गः सूपः कार्पासमाच्छादनम् नवयवार्थसंख्येन विकारे भक्षस्यावयवो वाच्छादनस्य
प्रयुज्यते अस्वादिति वाच्ये समासे तदभावात् भाषायां किं वैदिको मौञ्ज यूपस्तिष्ठति इति हि विकारः पर्णमयघटो वैकल्पिकत्वादेव
गतार्थेन यापि बहुत्वप्रकृतिकस्य मयटो वेदे विकाराणि विकार्यत्व च नियमग्रहणार्थम् यद्यपि स्याद्वचस्येदमीति सूत्रस्य
कैदसिद्ध्यर्थमपवेतिनियमेन गतार्थेन प्राप्ति न त्वद्य वक्केदसव इति विपरीतप्रेकान्तिवारणार्थं मे वा अभाषायामित्यु
पात्तमिमाहुः॥ नित्यं वृद्धशरादिभ्यः॥ वृद्धसंज्ञेभ्यः शरादिभ्यश्च मयट् भाषायामभक्ष्याच्छादनयोरित्यनुवृत्तिरिति हि नि
कारः आम्रमयं शारमयम् शर दर्भ मृत् कुटीर तृण सोम बल्वज इत्यादेरनित्य आम्रमितरस्मात्तिदममयदस्य च विकारे मय।

५ दितिभगवन्माहेत्र्विनेमेगक्कते उक्तरीत्याकुंदसिमयटोहलेभवात्‌ यूंवकंदस्त्रीत्वमपवादवशेहविभावात्‌ अत एव विकारश
सि.मु. ह्यान्नेतिवममापुर्वा दितिवदतः तत्रकारस्यापि श्रानंदपदस्य बहुब्रुताक्कंदसिकत्वे मयटुक्तत्वमेवाभिप्रायः नचात्रमय वि
प्राणमयमनोमयप्राहेष्वविकारार्थकमयटूर्थयोगाद्व्यापिनम्नाहवधामयेतिवाच्यं अमयवेस्राहचर्यसम्प्रयोजकत्वात्‌
७४ अतएव प्राचीनैस्तत्रप्राचुर्येमयविहितमुक्तम्‌ अथाहुः इह भाषायामितिमाउम्‌ छंदसिमकलविकल्पानां व्यवस्थितत्वात्‌
75 प्योगमलेपस्कंदसीतिसूत्रे शिपकेदसोमेगास्य भाष्यकृता उक्तत्वा यस्कादिभ्यश्चेमादिश्रेणीनामिमेछंदसीमादीनां वै
याकरणाध्येयमेवसमाख्यानात्‌ एवंवदाचवछंदसि मोलवद्‌ अविलादितिसूत्रद्वयमप्यनारभ्यमितितलावदम्‌ अरमयव
हेरिमादेमयदेदनयोरिमनैनेवसिद्धेः मौजंशिक्वामित्यादौ मयटः प्रसक्तभावाच्च विज्ञानमयपिशब्दे विकारेमयटस्त्व
प्राचीनैरपिविकारेमयटःस्त्रीकारात्‌ प्राचुर्येष्वानंदविरोधिनोदुःखस्य लेशतोत्रहमा विकारार्थपर्यवसानाद्वा इत्थाक
यहणानतुहीनेवौ अत्रहूतार्थविभाषायोनिममयत्र तु कुविदितिव्याख्यानाद्वा इति अथावेभसाममयीदेवतानिमत्वस्येदो नि
मवववमेयोगविभागेन कुर्विद्व्यापिनित्यमितिमतदर्थम्‌ नेनपकारोतिमे वाङ्मयं वाङ्मयं अन्नमयम्‌ आप्यमित्यत्र
नम्मदमित्राणीनातमार्थेयान्‌ आप्यमम्मयमितिममरः आप्येचेति … मितिक्षीरस्वामी नवेवशब्दादिभुस्त्वंहृपाद वे
यर्थमितिवेन्नर्हाप्तेः॥ गोश्च पुरीषे॥ गोःपुरीषं गोमयं पुरीषस्य विकारावयववोभयबहिर्भावान्मयदमिमेयंविधिः।
विकारावयववयोस्तयहूस्तनरनिमेयटायः॥ पिष्टाच्च॥ विकारेमयट्‌ पिष्टमयं भस्मपे शोहेरेमत्र शोषविकोरपे संज्ञायांकन्‌॥ ७५
पिष्टाद्दिमेव हृपोप्यपः पिष्टकःस्यादित्यमरः॥ व्रीहेःपुरोडाशे॥ मयट्स्यात्‌ विल्वाद्यणोपवादः व्रीहिमयः पुरोडाशः॥ वेहममत्‌॥ ए
यक असंज्ञायांतिलयवाभ्याम्‌॥ तिलमयं यवमयं संज्ञायां तु तैलपावम्‌॥ तालादिभ्योण्‌॥ अत्र मयटोपवादः तालाद्धनुष्येव
मालेयधनुः तालमयमन्यत्‌ तालवर्हिणेन्द्राविद्वा इन्द्रायुधमागारामाक्षपिप्पलोपदा इह तालशब्दमाकथो होद्ध्वा…

यद्वा हैरिणशब्दात्स्वार्थिकोऽण् हैरिणस्य विकारो वा हैरिणं ततो नित्यं वृद्धशरादिभ्य इति मयट्, अनुदात्तादेश्चेत्यञ् हरे

शसकः इति बोध्यम्। ईदृशाद्वृद्धाभ्यां विशिष्टाभ्यां मूलविभुजादित्वात्कः अमीषामपीति दीर्घः वपसालनेपत्रा यव

पिष्टत्वाद्बोध्यं वा बैल्व इति मध्योदात्तः। ईदृशाद्युग्गुसाहः सत्त्वासत्त्वे येणानोदात्तः। अणग्रहणं बाधकबाधनार्थम्। यथा विहि हि^

तस्य मयटो विधौ वा हैरिणशब्दान्मयट्प्रसंगात् न च वृद्धत्वे नित्यं वृद्धशरादिभ्य इत्यनेन बाधेन च विनाशे वा हीति संशयः॥

जातरूपेभ्यः परिमाणे। बहुवचनेन पर्यायाणां ग्रहणम्। सुवर्णवाचिभ्योऽण् स्यात् परिमाणे विकारे हाटको निष्कः। जात

रूपः। हाटकान्मयट् प्राप्तः तापनीयः। तिलस्वेनाम अध्यात्न सतपनीयशब्दस्य अनुदात्तादित्वादञ् प्राप्तः। परिमाणे किं

हाटकमयी यष्टिः। प्राणिरजतादिभ्योऽञ्। प्राणिवाचिभ्यो रजतादिभ्यश्च विकारावयवयोरञ् स्यात्। अनुदात्तादेरञ् सिद्धः

पूर्वमेवोक्तत्वात् तेनाद्युदात्तार्थं वचनं शौक्रं बार्कं शाणिनो वक्रपूर्वाणामिति साद्युदात्तत्वम्। राजतं राजतसीसलोहउदुम्बर

नीपदारुरोहितकविभीतकपीतदारुतीव्रदारुत्रिकण्टककण्टकार। रजतादिगणे येषामनुदात्तादित्वं तेषां मयड्बाधनार्था।

र्थः पाठः। अन्यथा परत्वान्मयट्प्रसंगात्। ञितश्च तत्प्रत्ययात्। विकारावयवार्थकञित्प्रत्ययान्तात्तयोरेवार्थयोरञ्

स्यात्। शरभस्य। यथा दैवदारवस्य विकारो अवयवो वा दैवदारवः। अनुदात्तादेश्चेत्यञ् अत एव दाधित्यस्य विकारो अवयवो

वा दाधित्थः। कापोतः। पूर्वत्वात् श्यामीलस्य शामीलः। ननु किमर्थम् इदं कपोतविकारस्यासामर्थ्यसरूपो वि

कारः कपोतावयवस्य सक्त्वादिः कापोतस्यावयवो भवति इति विकारविकारस्यावयवावयवस्य च विवक्षायां।

मात्सस्य दलकलत्वात्सयमद्वीपवादः भाष्यकारास्त्वाहुः कपोतशब्दस्य तदवयवादौ लाक्षणिकत्वात् अस्मादेवानुदात्ता

दञा सिद्धम्। एवं दैवदारवादावपि योज्यम्। न च कापोतशब्दान्मयट् दोषो बाधकम्। विवक्षाया अप्रामाणिकत्वादिति वाच्यम्। अ

नभिधानादेव तदनापत्तेः॥ क्रीतवत्परिमाणात्॥ प्राग्वतेष्ठञित्यधिकारे अर्हादीनामपवादः। निष्कस्य विकारो नैष्किकः॥

हि^

ते न क्रीतमित्यादिना यड्याधि पुरस्कारेण क्रीतार्थे ये
प्रत्यया उक्तास्ते तथैव विकारे निर्दिश्यन्ते

वुञ्स्यात्॥ औमकं॥

५ तेन क्रीतमिति ठञ्॥ शातस्य विकारः शा(तः) शातिकः शाताद्भुठञ् न्यूनताविशेषेणेते॥ उष्ट्राद्वुञ्॥ प्राणिरजतादिभ्योऽञित्यस्यापवादः उष्ट्रस्य
सि.सु. विकारोऽवयवो वा औष्ट्रकम्॥ उमोर्णयोर्वा॥ औमकं॥ वुञभावपक्षे उमाशब्दादण् ऊर्णाशब्दादञ् तादृशाभिनाग्रुदात्तवा
ने ऊर्णाशब्दादञ् अनुदात्तादेश्चेत्यस्य फिट्स्वरेणान्तोदात्तत्वात् औमम् और्णम्॥ एण्या ढञ्॥ प्राणिरजतादिभ्योऽञित्यस्यापवादः एण्या सा.
76 विकारोऽवयवो वा ऐणेयं एणस्य तु ऐणं प्राण्यणन्ताद् ऐणेयमेणीमांसं ऐणमेणस्य मांसमित्यमरः॥ गोपयसो
र्यत्॥ गव्यं पयस्यं नन्वसर्वत्र गोरजादिप्रसंगे यत् विहितत्वात् तेनैव सिद्धे मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोरिति मयट् बाधिते
नदारंभात् द्रोश्च॥ द्रोर्हेतस्य विकारोऽवयवो वा द्रव्यम्॥ गुणः वा तादृश्यमस्य पृथग्भावादेशः शेरत्नित्यस्य पक्वा वोति
ममिति मयटोऽपवादः॥ माने वयः॥ द्रोरिव यो तत्त्ववत् प्रयाप्यमिति मानार्थकं तत्रयम् यतोऽपवादोऽयम्॥ फले लुक्॥
विकारावयवार्थस्य प्रत्ययस्य लुक् फले वाच्ये फलितस्यद्वयस्य फले विकारोऽवयवो वेति तदनन्तरार्थे प्रत्ययस्य इति
संप्रदायः आमलक्याः फलमामलकं नित्यं वृद्धेति मयट् तस्यानेन लुक् लुक् तद्धितेति ङीषो लुक् न च स्यात् नातिव
त्वाद्भस्येति वर्तिष्यकारस्य लोपसिद्धिः लुकालमेत्यानिवर्तमाना वायितिष्याख्यातेनुपदातेति सूत्रे॥ प्लक्षादिभ्योऽण्॥ आ
रम्भ नैयग्रोधम् विधानसामर्थ्यान्न लुक् शिग्रुककेंधुभ्यामुका तन्ततादस्मेभ्यो तुदात्तादित्वान्नाप्रणोपवादो
यम् लत मयोध ग्रपस्य इंगुदीशिग्रु कर्कंधुबृहती लतः शद्गुः पिट्स्वरेणाषष्ठ्यशब्दस्य हृतादित्वादिंगुदी इहती
शाहोगोरादिङीषन्तत्वात् प्रययस्य रेफान्तोदात्ताः आद्युदात्तेणवलात्त नैयग्रोधं इंगुदं फलं इत्यमरः॥ जंबाया॥ फले एवा
स्यात् जांबवं फले गेरज् तस्य फले लुक् जंबु हस्वो लञ्जमके इति हस्वः जंबाः स्त्री जंबु जांबवमित्यमरः॥ लुप् च॥ जं
हमकतिकस्य फलप्रत्ययस्य वा लुप् युक्तवद्भावात् स्त्रीत्वम् जंबूः फलपाकशुषा शुपसंख्यानम् फलपाकेन ये
शुष्यन्ति तेषामित्यर्थः व्रीहयः शस्ताः पुष्पविल्लादित्वादण् माषाः इत्यादौ मौद्गाः कोराः तयोर्लुप् पुष्पमूले तद्वद्

लम् मल्लिकायाः पुष्पं मल्लिका लवावंतश्चेतोदात्तः पुत्रदात्तादेश्चेत्यत्र एवं जाती विदारी मूलं विदारी जाती बृहतीश्च
बृह्यौ गौरादि‚ उं एतत्ज्ञाप्रयत्नस्येणितोदात्तो बहुलं ग्रहणं किं पाटलानि पुष्पाणि मौलानि मूलानि विनुदिनादरएर् कि
हृत्वरेणोतोदात्तः बहुलोकेः कचिल्लुक् अशोकं करवीरम् हरीतक्यादिभ्यश्च ॥ फलं अतिर्यस्य लुक् हरीतक्यादीनां
लिंगमेवप्रकृतिवत्तनुवद्वचने हरीतक्यादिषु व्यक्तिविभक्तित्वात् हरीतक्याः फलानि हरीतक्यः हरीतकी कोशा
तकी नखरजनी खेष्करी दाडी दोडी श्वेतपाकी अर्जुनपाकी काला ला गर्भतिका कंटकारिका शोफालिका
इहहातादिभ्यो बृहद्भ्यो मयट् पुत्रदात्तादिभ्यात् इतरेभ्योऽणः तेषां लुक् ॥ कंसीयपरशव्ययोर्यञनौ लुक् च ॥ शाभ्यां
मेणयञनौ लः नत्यत्र मतेनेतयोः कथं नो अत्र लुक् कंसाय हितं कंसीयं ॥ प्राक्क्रीतादित्यधिकारेतस्मै हितमिति छः प।
वंशपरशव्य उगवादिभ्य इति यत् तयोर्विकारः कांस्य पारशवम् यद्यपि परशोः शाहुस्यात्रुदात्तादित्वात् दिसिद्धः तथा।
विधतो लगत्यर्थमारंभः नद्यस्येति चेत्स लोपे हलस्तद्धितस्येति यलोपान्न सिद्धिः ईकारे परतएव तद्विधानात्
द्दोषतो यः समाप्ताः ॥ इति श्री सिद्धान्तसुधानिधौ वृत्तौ चतुर्थाध्यायस्य तृतीयपादे द्वितीयमाह्नि
कम् समाप्तश्चायं तृतीयपादः ॥ प्राग्वहतेष्ठक् ॥ तद्वहतीत्यतः प्रागधिकारोयम् यद्यपि विशेषविधौ विशिष्य।
प्रत्ययाः प्रकृतिभ्यस्तत्र निर्दिष्टेष्वर्थेषु ठक् स्यात् तदाहेति माशब्दादिभ्य उपसंख्यानम् नदि तिकमेति दे
शमाव तन्समर्थविभक्तिः आहौ प्रभूतादिभ्य इत्यत्र प्रयोगेन दारंभः अतः पदमत्र शब्दादर्थमध्यः माशब्द इत्याह मा
शब्दिकः वाक्यप्रतिपादिकत्वाभावात् द्वितीयानुप्रमत्वापि इतिनाप्रमवमध्यमाप्रसवाकाध्यमवचनेन क्रियाम
वधानकर्मत्वम् नित्यः शब्द इत्याह नैत्यशब्दिकः आहौ प्रभूतादिभ्यः आहेत्यस्मादनंतरमनुप्रयोगस्थमिकारः तेनाह
विनिर्दिष्टः प्रभूतमाह प्राभूतिकः पार्यामिकः क्रियाविशेषणत्वात्कर्मत्वम् ॥ हस्तेन वर्तनादिभ्यः निःस्तान्तुकर

सि.कौ.

णे शब्दे कार्यासंभवादिदं। तादर्थ्ये ठक् सम्पन्नोऽस्तीति सौत्रान्तिकः। सौवर्णायनिकः। अत्रैशानिकादिभ्याः भयपूर्वदृढि।
गन्त्वैतो परदारादिभ्यः। परदारान्गच्छति पारदारिकः। गौरुतल्पिकः। माथाहादयः प्रयोगादनुसर्तव्याः॥ तेन दीव्यति खनति दीव्य
ति जयति जितम्॥ अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अभ्रिः स्त्री काष्ठकुद्दाल इत्यमरः। अभ्रिमादन इत्या।
क्षतावपिप्रसिद्धयं। अक्षैर्जितमाक्षिकं द्रव्यं कालस्योऽभ्यपारात्रमतत्रम्। साधनत्वविवक्षितमेव। जयति जितमिति क
र्तृकर्मणोः शप्श्यपाद्यानात्॥ संस्कृतम्॥ दध्ना संस्कृतं दाधिकम्। मारीचिकम्॥ योगविभाग उत्तरार्थः॥ कुलत्थकोपधाद
ण्॥ ठकोऽपवादः। कुलत्थैः संस्कृतं कौलत्थम्। तैत्तिडीकम्॥ तरति॥ उडुपेन तरति औडुपिकः॥ गोपुच्छाट्ठञ्॥ गोपुच्छेन तरति।
गौपुच्छिकः॥ नौद्व्यचष्ठन्॥ नावा तरति नाविकः। तिमारागुर्दा नतनम्। घटेन तरति घटिकः। बाहुभ्यां तरति बाहुका स्त्रीस
षकारः। संहितानिर्वधनात्रगतिपानुर्वधइतिषत्वाभावानडीषु। तदाह वार्त्तिककारः। आकर्षात्पर्पादेर्भस्त्रादिभ्यः कु
सीदसूत्राच्च आवसथात्किशरादेः षितः षडेते ठगधिकारे॥ चेतेष्टल्वपययास्तुसेप्रतिकेपटः॥ चरति॥ तृतीयान्ता
द्गच्छति भक्षयतीत्यर्थयोः ठक्। हस्तिना चरति हास्तिकः। शाकटिकः। दध्ना चरति दाधिकः॥ आकर्षात्ष्ठल्॥ आकर्षो नि
कषोपलः सुवर्णपरीक्षार्थः। तेन चरति आकर्षिकः। आकर्षेतिमाधवोक्तपाठस्तु चिन्त्यः। उपयस्त्ववार्त्तिके कफयुक्त एव।
पाठात्। षित्त्वादाद्भ्योऽपि आलजाननवपाप्नेः षिल्वाङ्गीष्। आकर्षिकी॥ पर्पादिभ्यः ष्ठन्॥ पर्पेण पीठेन पंगवश्चरन्ति सपर्पः। ते
न चरति पर्पिकः। पर्पिकी। पर्पगतौ हलश्चेति करणे घञिति केचित्। अश्वेन वपा शिल्पवाप्यहूयतपतत्यस्यां ते रथ्यः।
ग्यानेपर्पैः शद्वेपठिता पद्भ्यालनप्रव्रायोपितस्मात्। पर्पण्ठवालत्वमेवमाहुः। पर्पेणाश्वेन रथजालमाथवालपादः
पद्भ्यां चरति पदिकः। पञ्चवर्षकेचरताबुपमंख्योनमितिवार्त्तिकसैव प्रपेवः॥ श्वगणाट्ठञ्च॥ श्वगणेन चरति श्वा
गणिकः। श्वागणिकी। ष्ठञ्पक्षे सहागादिनेष्यिद्वे इत्युक्तेति पेचोनिषेधः। इकारादिग्रहणं श्वस्तत्र वस्मागणत्वात्। वकारा

तद्वहन् ष्ठन् घाणिकः घाणिकी ॥ वेतनादिभ्यो जीवति ॥ वेतनेन जीवति वैतनिकः वेतन वाह अर्धवाह धनुर्दण्ड रूपसेवा
न विगृहीत यो हि पादानं धानुर्दण्डिकः धानुष्कः दण्डिकः जाल वेश उपवेश प्रेषण उपहस्ति सुख शक्ति उपनिषत्
उपवेश स्रक् पाद उपस्थान ॥ वस्नक्रयविक्रयाट्ठन् ॥ वस्नं मूल्यं तेन जीवति वस्निकः क्रयविक्रयग्रहणं संघातविगृही
तार्थं क्रयविक्रयिकः क्रयिकः विक्रयिकः ॥ आयुधाच्छ च ॥ चात् ठन् आयुधेन जीवति आयुधीयः आयुधिकः ॥ हरत्यु।
× तां नयनं कुम्पादानं वा उत्संग उडुप उत्पत पिटक ॥ भस्त्रादिभ्यः ष्ठन् ॥ भस्त्रया हरति भास्त्रिकः ४
त्सङ्गादिभ्यः ॥ उत्सङ्गेन हरति औत्सङ्गिकः हरस्त्रियां षित्वात् ङीष् ॥ विभाषा विवधात् ॥ विवधेन हरति विवधिकः षष्ठेठकु
वैवधिकः वीवधाच्चेति वक्तव्यम् वीवधिकः नवा मा विवधिक माया नासिद्धिः उभाभ्यां समयस्य हत्वात् एकदेशवि
कृतमायासिद्धत्वात् कथं नैवेदं हलिकृतानां वीवधशब्दोपि सिद्धेषु श्लिमः तदनुसारेणैव ग्रंथे विहितस्त्रेति विभाषा वि
वधवीवधा ॥ विभाषेति किं यदेनोक्तम् ॥ अण् कुटिलिकायाः ॥ कुटिलिका व्याधानां गतिविशेषः कर्मारलोहग्रहणी च
कुटिलिकया हरति मृगं अंगारान्वा कौटिलिको व्याधो लोहकारो वा ॥ निर्वृत्तेऽक्षद्यूतादिभ्यः ॥ अक्षद्यूतेन निर्वृत्तमाक्ष।
द्यूतिकं वैरं अक्षद्यूत जंघाप्रहत कण्टकमर्दन पादस्वेदन कण्टककर्दम गतागत गतानुगत ॥ त्रैविगुणम् विषमपाता
हनीया समर्था निर्वृत्तमित्यर्थमस्मात् निर्ग्रहणं वाक्यनिवृत्तमर्थं महाविभाषायां तेन निवृत्तः अन्नतयोक्त विभाषा
याश्च स्वरितत्वादेव निवृत्ते: नेन लौकिकविग्रहक्रु शिष्टस्य न प्रयोगः न च निवृत्तमार्थे मयो विधानात् कृत्रिमानिर्वृ।
त्तमिमयैव वाक्यस्य निवृत्तिः स्यादनुवृत्तिः किं यतः स्मादेरपीति वाच्यम् त्रिमिति यो गविभागाद्यं विशेषमनाट
मेव स्वातंत्र्येणाग्रयोगस्यावर्तमानात् ॥ भावप्रत्ययांतादिमब्वक्तव्यः पाकेन निर्वृत्तं पाकिमम् त्यागिमम् एवं च मन्नक
नेकः क्रियत्यस्यापि भाववचनत्वादनेनैव सिद्धो ऽयं तिनि प्रमार्थे भावे मादेशानुवृत्तिः तेन निर्वृत्तेन वाक्यनिवृत्तिः नि
र्मितिवचनान्तेणाप्रत्यापि स्वातंत्र्यं प्रतिषेधः एवं च समयोगाद्वि शिष्टस्य ग्रहणं शोकानवकाशात स्वभाववचनात्।

४
सि॰ म॰

न्त्वाभावात् स्वरेपि न विशेषः इदन्तनिहन्निस्वरेणाद्यमपि इकारस्योदात्तत्वात् कृत्स्वरेणाप्यन्त्यस्य पक्षे स्वरेणान्तोदात्तत्वात् म-
ध्येविधाने विमकारागकारस्याप्युदात्तत्वात् ॥ अपमित्ययाचिताभ्यां कक्कनौ ॥ अपमित्येति इहोद्यं माङो ल्यतिहारे इति का-
तस्य गतिसमासे ल्यप् मयतेरिदन्यतरस्यामितीत्वम् ह्रस्वस्येति तुक् अस्मरतीयोनत्वामेभावेपिपृच्छमोत्तादेवप्रस-
यः अपमित्य निर्हृत्तमापमित्यकम् किंत्वाह्वृद्धिः याचितेन निर्हृत्तं याचितकं विभूषणं याचितकं कदाचिदिति श्रीह-
र्षः ॥ संसृष्टे ॥ दध्ना संसृष्टं दाधिकम् चूर्णादिनिः सर्वेणापि प्रसमस्य ठकोपवादः चूर्णैः संसृष्टाः चूर्णिनो ऽपूपाः ॥ लवणाल्लुक् ॥
सैन्धवादिद्रव्यवाचिनो लवणशब्दात् संसृष्टार्थस्य ठको लुक् लवणेन संसृष्टो लवणः सूपः लवणं शाकं लवणाय-
वागूः ॥ मुद्गादण् ॥ मौद्गः ओदनः ॥ व्यञ्जनैरुपसिक्ते ॥ दध्ना उपसिक्तं दाधिकं संसृष्टत्वात् सिद्धे उपसिक्तग्रहणं पयः दध्यादि-
योगाद्व्यञ्जनविशेषाभिव्यक्तिस्तत्संसृष्टतादृश्ये ह्रणार्थम् तेनेह न दध्नोपसिक्ता स्थाली ॥ ओजःसहोम्भसा वर्तते ॥ ओजसिकः शू-
रः साहसिकश्चोरः आम्भसिको मत्स्यः ॥ तत्प्रत्यनुपूर्वमीपलोमकूलम् ॥ द्वितीयान्तात् प्रत्यनुपूर्वादीपा-
देर्वर्तते इत्यर्थे ठक् प्रतीपं वर्तते प्रातीपिकः आन्वीपिकः प्रातिलोमिकः आनुलोमिकः प्रातिकूलिकः आनुकूलिकः
न वर्तेरकर्मकत्वात्कर्मणोऽपायितानुपपत्तिः द्वितीयायाः क्रियाविशेषणत्वस्य युक्तत्वात् न चेदमेवत्वापक-
मित्यपेदेतत् ॥ परिमुखं च ॥ परिमुखं वर्तते पारिमुखिकः अपपरीवर्जने इति कर्मप्रवचनीयत्वम् पञ्चम्यपाङ्परिभि-
रिति पञ्चमी अपपरिबहिरञ्चवः पञ्चम्या इत्यव्ययीभावः स्वाम्यादेरभिमुखं वर्तते इत्यर्थः सर्वतोभाववृत्तेः परिशोहस्पग-
तिसमासे तु तदभिमुखेष्वनिरिमर्थः चकारात्पारिपार्श्विकः ॥ प्रयच्छति गर्ह्यम् ॥ द्विगुणार्थं प्रयच्छति द्वैगुणिकः शब्दद्या-
म्यद्विगुणग्रहणार्थं प्रदत्तमितस्य अत एव गर्ह्यत्वम् तावद्वृद्धेः शास्त्रनिषिद्धत्वात् गर्ह्यं क्रियाविनाद्विगुणमर्थ-
स्येदहाति यन्नद्विगुणं प्रयच्छन्नुमतोऽनेनेति प्रवृद्धाहरणम् न द्विगुणं तत्र वृद्धेरवदेश्यत्वात् दीयमानद्रव्यापेक्षं द्वैगुण्य ७८

सवयक्रमर्थत्वात् पवैयग्रणिकस्मादिह दे देधुषिभावोभावः वृद्धिशब्दो वृद्ध्यर्थे वृत्तिः वृद्धिं तदर्थं ददाति वार्धुषिकः
वृद्ध्यात्मनो वस्तु वार्धुषिरिमम र्धुषिमः इति वृद्ध्यर्थादपः नलेनः स्यान्नवार्धुषी वार्धुषिः समकं पत्नीमादिशत्वार्थम्॥ कुसी
सूत्र॰ ददशैकादशात्ष्ठन्ष्ठचौ॥ गर्हार्थाभ्यामाभ्यामेताभ्यां त्वः प्रयच्छतीत्यर्थे ष्ठन्ष्ठचौ समाहारद्वन्द्वः कुसीदपदं वृद्ध्यर्थे द्रव्यपरे कुसी
दे प्रयच्छति कुसीदिकः वस्तुतो दशाद्देशात्वादेकादशपदेवेति कर्मधारयः संख्यायाः प्रतीयस्माद् इति दशपदाद्वृद्धस्य ष्ठ॰
वेतिपातः इदेव निपातनात् दकारः समासान्तः दशैकादशादद्दतीति दशैकादशिकः एकादशपुरुषादीन् शारवे
न प्रतिनाय दशादयतीत्यर्थः षित्वाड्डीष् कुसीदिकी दशैकादशिकी॥ उञ्छति॥ बदराण्युञ्छति उञ्छितीति बादरि
कः उञ्छः कणशआदाने कणिशाद्यर्जनं शीलमिति यादवः॥ रक्षति॥ समजं रक्षतिसमाजः समूहस्तं रक्षति सामा
जिकः शब्ददर्दुरं करोति शब्दं करोतीत्यस्मिन्नर्थे तिशाब्दिकः दर्दुरं वाद्यभाण्डं करोति दार्दुरिकः कुलालः दर्दुरस्तोय
दे भेके वाद्यभाण्डभेदयोरिति विश्वः॥ पक्षिमत्स्यमृगान्हन्ति॥ मत्स्येति स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम्
पक्षिणो हन्ति पाक्षिकः शाकुनिकः तैतिरिकः मात्स्यकः मैनिकः न च स्यैतिष्ठितिपतो पायनिः मत्स्यमृगपक्षि
मारिपरिगणनात् भात् मार्गिकः हारिणिकः सारंगिकः न च हरिणशब्दस्य मृगविशेषवाचित्वेन शंक्यता व
क्रैकदेशभेदान् मृगशब्दपर्यायत्वं कथमिति पर्यायत्वेनापि कोषादावुक्तत्वात् परिपंथं च तिष्ठति वकारो हेती
मर्थं सुप्तस्य षष्ठ्यर्थे हृतीयान्तात्परिपंथशब्दात्तिष्ठति हेतिवेमनार्थे ठक् परिपन्थं तिष्ठति ठगिति तद्भावस्त
स्य रूपं पारिपन्थिकः चौरः॥ माथोत्तरपदपदव्यनुपदं धावति॥ माथ्य
तेगम्यत इति कर्मणि घञ्॥ दण्डमाथो दण्डाकारो मार्गः तेन धावति दाण्डमाथिकः पदवीं धावति पादविकः अनुपदं
धावमानुपदिकः॥ आक्रन्दाट्ठञ्च॥ ठक् च आक्रन्दशब्दो धिकरणे घञन्तः ताक्रन्दः भिन्नो रोधनस्थानार्थः आक्रन्दः तथा

पर्याये ष्वमीनस्यैव ग्रहणं पक्षिमृगयोः स्वरूपस्य

समाकेरिकः ॥ परोक्षवपदं गृह्णाति ॥ सर्वपदं गृह्णाति पौर्वपदिकः औत्तरपदिकः ॥ बहु च्च सर्वेवा ग्रहणार्थं पदोत्तरादिति ।
लोकम् ॥ प्रतिकण्ठार्थललामं च ॥ प्रतिकण्ठं गृह्णाति प्रातिकण्ठिकः कण्ठं कण्ठं प्रति प्रतिकण्ठं लक्षणेनाभिप्रती इति अ
व्ययीभावः प्रतियत्नः कण्ठमिति प्रादिसमासः समासग्रहणं वाऽऽभ्यामिति संग्रहार्थः आर्थिकः लालामिकः ॥
धर्मं चरति ॥ धार्मिकः चरतिरासेवार्थः सा च स्वाभाविकी प्रवृत्तिः न त्वनुष्ठानमात्रे स्वभावात् दुष्टे नैकस्मात् धर्मा
त् प्रवृत्ते धार्मिक इति व्यवहाराभावात् धर्मपदमत्र गृह्यते विहितक्रियापरं अधर्माच्चेति वक्तव्यम् ॥ आधा
र्मिकः ग्रहणं वा माति पदिकेन तदन्तविधेरभावादारम्भः ॥ प्रतिपथमेति ठंश्च ॥ चाद्वक्तवी साया मामि
अव्ययीभावः प्रतिपथमेति प्रातिपथिकः ॥ समवायान् समवैति ॥ प्रवेशपूर्विका समानदेशव्याप्तिः स
मवायः सर्वे सस्थानार्थः प्रवेशापेक्षया समवायानिति द्वितीया बहुवचनं पर्यायग्रहणार्थम् सामवायिकः सामूहिकः
सामाजिकः कुत्सितेन समवेता इत्यादौ विशेषणापेक्षा सप्तमी वोध्या ॥ परिषदो ण्यः ॥ ठकोऽपवादः परिषदं समा
वैति पारिषद्यः ॥ सेनाया वा ॥ ण्यः स्यात् पक्षे ठक् सेनां समवयन्ति सैन्याः सैनिकाः सेनायां समवेता इति वार्थे का
र्थपरे द्वितीयान्तात् प्रत्ययविधानात् सेनायां ललाटं कुक्कुट्याः पश्यति ललाटं पश्यति लालाटिकः लालाटिक इमे
भौलदर्शी कार्येष्वक्षमश्च कुक्कुटी शब्देन तत्पाताई स्वल्पदेशो लक्षणिकः कौक्कुटिकं मण्डनपर्याप्तदेशं पश्यति ।
कौक्कुटिको भिक्षुः संयतत्वेन दृष्टिनिक्षेपाह्वरमदेशपातात् सेनापदं प्रसिद्धार्थविशेषपरम् ॥ तस्य धर्म्यम् ॥ धर्मादनपे
तमित्यर्थे षष्ठ्यन्तात् ठक् स्यात् आपणिकम् ॥ अणमहिष्यादिभ्यः ॥ महिष्या धर्म्यं माहिषम् महिषी यजमानपत्नी वि
लेपिका अलेपिका अनुलेपिका प्राद्धाहितम शालो अनुवाहिक यजमान आतोन् समर्यानि
कथः विशसितुर्धर्म्यं वैशस्त्रं विभाजयितुर्णिलोपश्चावचाय्यः विभाजयितुर्धर्म्यं वैभाजित्रम् ॥ अवक्रयः ॥ अवक्री

सूर्यमित्यर्थे ठक् पौत्रर्थ मर्य पौत्रम् नराच्चेति व त्वं नरस्य धर्म्या नारी विप्रासितरिङ्लोपश्च ॥

यत्नेनेनेतिकरणोपरत् शुल्कस्यानेवणि[illegible]ः प्रतिभोङ्गात्स्यात्टइत्यवक्रयः शुल्कशालाया अवक्रयः शौल्कशालिकः
आपणिकः नवधर्म्यमिमेवसिद्धिः लोकपीड्याप्रुपपन्नेः तदस्य पण्यम्॥ अपूपानां हस्य पण्यमिममर्थेठक् आपूपा
पण्यमस्यापूपिकः॥ लवणाट्ठञ्॥ लावणिकः ठगपवादः स्वरे विशेषः॥ किसरादिभ्यः ष्ठन्॥ किसरापण्यमस्य किसरिकः
षित्वान्ङीष् किसरिकी॥ किसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः किसर नरद नलद स्थगल तगर गुग्गुल उशीर ह
रिद्रा हरिद्रुपर्णी॥ शलालुनोऽन्यतरस्याम्॥ शलालु सुगन्धिद्रव्यभेदः पण्यमस्य शलालुकः शलालुकी पक्षे ठक् शा
लालुकः शालालुकी॥ शिल्पम्॥ मृदङ्गपदं तद्वादनविषयकपरम् मृदङ्गः शिल्पमस्य मार्दङ्गिकः अर्थयोरनयोर्यो
नभिधानात् क्रियाभ्यासपूर्वकं ज्ञानविशेषः शिल्पम्॥ मड्डुकझर्झरादणन्यतरस्याम्॥ माड्डुकः माज्झरः पक्षे ठक् माड्डुकि
कः माज्झरिकः॥ प्रहरणम्॥ तदस्येत्येव असिः प्रहरणमस्यासिकः धानुष्कः इसुसुक्तान्तात्कः इति ठस्य कादेशः शाः सा
इति विसर्गस्य षत्वम्॥ परश्वधाट्ठञ्च॥ पारश्वधिकः पक्षे ठक् स्वरे विशेषः॥ शक्तियष्ट्योरीकक्॥ शाक्तीकः याष्टीकः॥ अस्ति
नास्ति दिष्टं मतिः॥ अस्ति परलोक इति मतिर्यस्य स आस्तिकः एवं नास्तिकः अस्तिनास्तीति निपातौ यद्वा तिङन्तौ वाक्ये
वचनसामर्थ्यात्सा न विशिष्टप्रत्ययः अस्ति वृष्ट इति मतिर्यस्य येन प्रत्ययेनाभिधानात् दिष्टशब्दो दैवपर्यायः
दिष्टं मतिर्यस्य स दैष्टिकः दैवपरायण इति कैयटः प्रमाणानुपातिनी मतिर्दिष्टाऽस्यास्तीति केचित् तथास्तीति उत्सर्गे मध्ये
क्यते शीलं प्रमाणं विषयम्॥ शीलम्॥ आपूपिकः अपूपभक्षणपरः भक्षणक्रियाशीलं वार्ह्यं तावत्प्रयोजकाव॥
छत्रादिभ्यो णः॥ तदस्य शीलमित्यर्थे छत्रशब्दो गुरुकार्येष्वावरणवृत्तिः छत्रं शीलमस्य छात्रः शिष्यः शिक्षा भिक्षा
पुरोहित स्था अस्य पुरस् सङ्ग्रामे वर्त्तिनः छात्र उपध्यानं कृषिकर्म विस्पातपत् समस्तव्रतमीशीविका विशिष्टे कर्म
शीलमस्य कार्मः कार्मस्ताच्छील्ये इति निपातनाट्टिलोपः॥ कर्माध्ययने वृत्तम्॥ अध्ययने वृत्तास्य क्रियाऽनर्थकास्य

५

सि॰ कौ॰

८०

मोन्यदुक्। एकमन्यदध्ययने कर्माध्ययने वृत्तमस्य ऐकान्यिकः। न द्वितीयं निमित्तमासोत्तरे ठक्। यदीयानस्य पाठसमये
कालेऽपकं स्खलितं जातमित्यर्थः। एवं द्वैयन्यिकः। त्रैयन्यिकः। इत्यादि। ऋद्धत्वाद्वयसि शब्दोऽध्ययने वृत्तमस्खलितपरः। बह्वच्पू-
र्वपदाट्ठच्। सर्वविषये द्वादशान्यानि कर्माणि अध्ययने वृत्तान्यस्य द्वादशान्यिकः। त्रयोदशान्यिकः। द्वादशादयोऽप्यपाठाः स्प-
ष्टत्वात् इत्यर्थः। चिन्तादिभ्यो दृशः। हितं भक्षाः। अपूपभक्षणं हितमस्मै योगादपि तदर्थे तन्म। उत्तरसूत्रादपकार्ये वा अपूपभक्षणं
हितमस्मै आपूपिकः। तदस्मै दीयते नियुक्तम्। अग्रभोजनं नियतं दीयतेऽस्मै आग्रभोजनिकः। श्राणामांसौदनाट्टिठन्।
श्राणा नियतं दीयतेऽस्मै श्राणिकः। मांसौदनग्रहणं संघातविगृहीतार्थं मांसौदनिकः। मांसिकः। औदनिकः। टित्त्वान्ङीप्
र्थं ठकार उच्चारणार्थः। श्राणिकी मांसौदनिकी वा गृहस्थानां। भक्तादणन्यतरस्याम्। पक्षे ठक्। भाक्तः। भा-
क्तिकः। तत्र नियुक्तः। आकरे नियुक्तः आकरिकः। अगारान्ताट्ठन्। देवागारे नियुक्तः देवागारिकः। अध्यायिन्य-
देशकालात्। निषिद्धदेशकालवाचिनोऽध्येतरि वाच्ये ठक्। श्मशानेऽधीते श्माशानिकः। चतुर्दश्यां चातुर्दशिकः। निषि-
द्ध इति किम्। स्रुघ्ने पूर्वाह्णेऽधीते। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। तत्रैव वंशाः कठिना यत्र स वंशकठिनो दे-
शः तत्र व्यवहरति वांशकठिनिकः। यत्र यत्र व्यवहारे तत्र व्यवहरतीत्यर्थः। प्रास्तारिकः। सांस्थानिकः। संस्था स-
न्निवेशः पर्यायः इति केचित्। निकटे वसति। नैकटिको भिक्षुः। आवसथात् ष्ठल्। आवसथिकः।
षित्त्वात् ङीष्। आवसथिकी। लित्त्वं स्वरार्थम्। आवसथं ... उपसर्गे वसतिरर्थे प्रत्ययः। ठकोऽवधिः समाप्तः।
प्राग्घिताद्यत्। तस्मै हितमित्यतः प्राक् यदधिकृतो वेद्यः। तद्वहति रथयुगप्रासङ्गम्। रथं वहति रथ्यः। युग्यः। प्रासङ्ग्यः।
वत्सानां दमनकाले स्कन्धे आसज्यमानं काष्ठं प्रासङ्गः। कर्मणि ... तदन्तविधेः रूपसंयोगानाम् ... इत्यादि। धुरो यड्ढकौ।
न हल्कौ। धुरं वहति धुर्यः। हलि चेति दीर्घः न भकुर्छुरामिति निषेधः। धौरेयः। धुरो ... इत्यर्थः।

ग्घि

णत्॥ सर्वा धूः सर्वधुरः । सर्वैकाल्लेक सर्वैत्तिसमासः सकारवध्ध्रिति सकारः समासान्तः खीवर्तेन शाद्वस्वरूपमपेदं सर्वधुरि
वहद्धीहाविति वत् सर्वधुरां वहतीति सर्वधुरीणः ॥ एकधुरोलुक् ॥ एकधुरीणः एकधुरः खकारः खश्चयान्नुकर्षार्थः खुन
स्तत्वलियितिविवेकः कूर्मयाजभुजगादिपयोग्रशावरिकुत्रैभिरेकधुरीणस्तिसृणादिः तेवोर्द्व्यायाधुरोवोढाकतस्
दा ९ मानकं इतियावत् ॥ शाकटादण् ॥ शाकटं वहतीति शाकटो गौः ॥ हलसीराट्टक् ॥ हलं वहति हालिकः सैरिकः ॥ संन्याया हैः ९
जन्या ॥ जनीवधूःसापयतिजन्या वरवधवस्येमाहुः नायते स्यागर्भइतिजनी जनितृसिभ्यामिण् जनिवध्योश्चेतिनवृद्धिः
कृदिकारादक्तिनिङीप् ॥ विध्यत्यधनुषा ॥ धनुर्भिन्नकरणिकायाव्यधक्रियायाः कर्तरिवाच्ये द्वितीयान्ताद्यत् पादैर्विध्यति
पद्याः शर्कराः पद्यमतदर्थइतिपद्भावः अधनुषाकिं चौरैर्विध्यतिसंभाव्यवाचधनुषः करणत्वे यत्प्रत्ययोगेसापे
क्षमादेवयत्प्रत्ययानुपपत्तेः ॥ धनगणंलब्धा ॥ द्वितीयान्तात्षष्ठ्यर्थेलब्धा धन्यः गण्यः ॥ अन्नात्सः ॥ अन्नंलब्धाअन्नीनः ॥ वशं
गतः ॥ वशात्वशारिणोहृपमलोनादृश् वश्यः परेवयामारी ॥ सहरसमलिनद्रायेत्स्थ पर्यङ्गकर्दमः नातिश्वर्क्ष इतियाव
त् ॥ मूलमस्याबर्हि ॥ मूलमुत्थपमते ईनोप्यादिःउद्धद्ध्वः सहमूलमिदं इतिप्रयोगादितिहरदत्तादयः ॥ प्राहुः सर्वान्नाविय
त् ॥ श्रावर्हेउमादनमस्मात्तोर्विदिहम्मूलमावर्हिउमादनोहिंवेमूलाः शुष्काःसमग्निष्म्यामूलोमादनसुतिरे
कोसंगृहीतमशाकाःश्यामधः ॥ संज्ञायांधेनुष्या ॥ वंधकत्वया ऋणमपाकर्तुंधेनुष्याधुकेश्वितारमुत्तमरःधनु
शद्वस्यगुगागमोयत्प्रत्ययश्चनिपात्यते तेनोनोदात्तत्वं धेनुरितिनत्ववृत्तित्वस्मात् ॥ गृहपतिनासंयुक्तेञ्यः गृहपतिना
यजमानेनसंयुक्तोगार्हपत्योग्निः नचाहवनीयादावतिप्रसंगः संज्ञायामित्यनुवृत्तेः ॥ नौवयोधर्मविषमूलमूलसी
तातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ॥ अष्टाभ्योहस्वरथ्यपुत्रकमायत् नावातार्यनाव्यं वयसा
तुल्यो वयस्यः धर्मेणप्राप्यंधर्म्यं विषेणवध्योविष्यः मूलेनानाम्यंमूल्यं प्राहुःसर्वस्यानमेवाभिमतोर्थः पोरदुपधादिति

५ यतिप्राप्तेप्रस्मादेवनिपातनात्तण्येन मूलेनपदादिविक्रयद्रव्येनेनमानाम्यमभिभवनीयं आत्मानेपुनुपकारकत्वेनसंपा
सि.कौ. द्यम् लाभइतियावत् तयाच मूलशब्दोलाभमात्रपरः लोकेतुमूलेनहि वैचधनं यावद्द्रव्यंतत्रमूलशब्दस्यप्रयोगात्
मूलवृद्धिसमुदायेतिष्ठुफलतण्णाबोध्या मूलेनसमोमूल्यः पटः उपादानसमानफलइत्यर्थः सीतयासमितंसीत्य
८। म् तेनसमीकृतमित्यर्थः रथसीताहलेभ्योयद्विधौतदंतविधेरुक्तत्वात्परमसीत्यमित्यादि तुलयासंमितंतुल्यंस
81 मपरिमाणम् तसास्यप्रयतमित्यादिप्रयोगात् ॥ धर्मपथ्यर्थन्यायादनपेते ॥ धर्मादनपेतं धर्म्यं पथ्यं अर्थ्यं न्याय्यं ॥
छंदसोनिर्मिते ॥ छंदसाइच्छयानिर्मितं छंदस्यम् छंदयतेरिच्छार्थादसुन् सर्वछंदस्यकारंतत्वन्निबोध्यः विद्युत्वादि।
वाचिवस्तुनेहस्यहृणोसेह्णाधिकारात् ॥ उरसोऽण्च ॥ उरसानिर्मितऔरसः चाद्यत उरस्यः पुत्रः ॥ हृदयस्यप्रियः ॥ प्रीणाती
तिप्रियः हृदयस्येतिकृद्योगेकर्मणिषष्ठी अलौकिकेतद्धितप्रकृतिभागेतु वचनसामर्थ्यात् हृद्यमयस्यवेद्यम्।
हृदयस्यप्रियोहृद्यः हृदयस्यहृल्लेखयदण्लासेष्विति हृदादेशः ॥ बंधनेचर्षौ ॥ हृदयशब्दाद्यत्स्यान्नाहृत्पकरणेयस्माद्धृद
भागोभिधेये हृदयस्यबंधनोहृद्यो वशीकरणमंत्रः ॥ मतजनहलात्करणजल्पकर्षेषु ॥ मतंज्ञानंतस्यभावःसाधनं
वामतम् करणशब्दोभावेकरणेवा ल्युडंतोस्यास्तोनात जनस्यजनसोजन्यः जल्पइतिभावेघञ् जनस्येतिकर्तरिष
ष्ठी हलस्यकर्षोहल्यः कर्मणिषष्ठी रथसीताहलेभ्योयद्विधौतदंतग्रहणात् द्विहल्यंत्रिहल्यमित्यादि ॥ तत्रसाधुः ॥ सा
धुरिहयोग्यः प्रवीणोवा नतूपकर्तानेसौहितमित्यस्यतत्रगतत्वात् अग्रेसाधुरग्र्यः सामसुसाधुः सामन्यः कर्मण्यःशे ८८
वाभावकर्मण्णीतिटिलोपनिषेधः शरण्यः ॥ प्रतिजनादिभ्यःखञ् ॥ प्रतिजनेतिवीप्सायामव्ययीभावःप्रतिजनेसा
धुःप्रातिजनीनः प्रतिजनंसंयुगमसंयुगं परसंयुगं परकुलं परस्यकुलं अमुष्यकुलं परस्यामुष्येत्यत्रनिपातना
त्षष्ठ्यालुक् सर्वजन विश्वजन महाजन पंचजन ॥ भक्ताण्णः ॥ भक्तेसाधवो भाक्ताः शालयः ॥ परिषदोण्यः ॥ परिष

हि साधुः पारिषद्यः परिषद इति योगविभागात् ण्यः पारिषदः ॥ कथादिभ्यष्ठक् ॥ कथायां साधुः काथिकः कथा विकथा वि
श्वकथा वितण्डा कुष्टविद् जनवाद जनेवाद वृत्ति संग्रह गण गुण आयुर्वेद ॥ गुडादिभ्यष्ठञ् ॥ गुडे साधुर्गौडिकः इक्षुः गु
डकल्माष सक्तु अपूप मांसौदन इक्षु वेणु संग्राम संघात प्रवास निवास उपवास ॥ पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ पथि साधुः
पाथेयं आतिथेयं वसतेः इति सप्तमी समर्थः वसतौ वसने साधुर्वासतेयी रात्रिः स्वपतौ वा साधु स्वापतेयं द्रव्यम् ॥
सभाया यः ॥ यत्प्रत्ययेन सिद्धे तत्राप्यर्थं ... सभायां साधुः सभ्यः ॥ ढश्छन्दसि ॥ सभेयो युवा सभायां सा
धुरित्यर्थः ॥ अस्मान्तरं वेधकर्मणि ... ॥ समानतीर्थे
वासी ॥ साधुरिति निवृत्तं निपातनात् ... तेन समानतीर्थे गुरुः तत्र ते ... तीर्थं शास्त्र
गुरुरेषोपाध्यायो ... समाने तीर्थे ... तीर्थ्य इति सादेशः ॥ समानोदरे
शयित ओ चोदात्तः ॥ ... समानोदरे शयितः समानोदर्यो भ्राता ...
नाम समानोदरशब्दो ... सोदरस्य ... विधानम् ॥ सोदराद्यः ॥ विभाषोद
र इति सादेशः सोदर्यः ... तीर्थे ये समानोदरे ... समा
नार्थात् तेन सोदरशब्दात् यत्प्रत्ययः सोदरशब्दः समानार्थकेन सह ... बहुव्रीहिः ... समानस्येति
सादेशः तेन सहोदरशब्दादपि सिद्धम् ॥ भवे छन्दसि ॥ सप्तमीसमर्थात् ... यत् ... यथासंभवं शैषि
कानां ... अपवादः ... सर्वे विधयो वैकल्पिका ... सामान्य ...
... विशेषः ... आपात् समासे ... ॥ ... हिलोपः
... ॥ वेशन्त ... ॥ वेशन्त्यः ... हैमवत्यः ...

पद्ये यत्

ह्या ॥ स्रोतसो विभाषा ड्यड्ड्यौ ॥ स्रोतसि भवः स्रोत्यः स्रोतस्यः ॥ सगर्भसयूथसनुताद्यत् ॥ समानेन कर्मधारयो बहुव्रीहिर्वा ।
समानस्य छन्दसीति सादेशः अनुभ्राता सगर्भ्यो अनुसखा सयूथ्यः यो नः सनुत्य उत वा जिघत्नुः ॥ अग्राद्यत् ॥ अग्रियः अग्र
सि॰ख॰ शब्दो धनाकाशयज्ञविशेषेष्विति वृत्तिः ॥ अग्राद्यत् ॥ घच्छौ च ॥ अग्रे भवः अग्र्यः अग्रियः यस्तेन मेनो दाने यन्ने
८२ नमाद्युदात्तम् अग्रीयः अत्र भवे छन्दसीति यति सिद्धेपि यत्नादिभिः स्वरार्थो मा भूदिति घ्नविधानम् ॥ समुद्राभ्रा
द्घः ॥ समुद्रियं सदनमाविशस्व नानदतो अभ्रियस्येव घोषाः ॥ बर्हिषि दत्तम् ॥ बर्हिष्येषु निधिषु ॥ दूतस्य भागकर्मणी ।
भागः कर्म वा दूत्यम् ॥ रक्षोयातूनां हननी ॥ षष्ठी बहुवचनान्ताभ्यां रक्षोयातुशब्दाभ्यां हननकार
णीभूतायां वाच्यायां यत् रक्षोहननी रक्षस्या तनूः यातव्याः ओर्गुणः वान्तो यीमवादेशः ॥ रेवतीजगतीहविष्याभ्यः
प्रशस्ये ॥ प्रशंसने यत् रेवत्यादीनां प्रशंसने रेवत्यं जगत्यं हविष्यम् हविषे हिता हविष्या तस्याः प्रशंसनमित्यर्थः ।
यस्येति लोपः हलो यमां यमि लोप इति यलोपविकल्पः ॥ असुरस्य स्वम् ॥ असुर्यं देवेभिर्धायि विश्वम् ॥ मायायामण् ॥ यतोप
वादः आसुरी माया ॥ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ॥ वर्चस्वानुपधानो मन्त्रो यासामिष्टकानामु
पधानकरणानां तासु वाच्यासु तत्र वर्चः प्रकृतिकमतुबन्तप्रकृतिकात् मत्वर्थे यत् स्यात् प्रकृते तत्समवयोर्लुक्
च वर्चस्वान्मन्त्र उपधानकरणो यासामिष्टकानां ता वर्चस्याः एवं ऋतव्याः उपदधाति ऋतुशब्दवन्मन्त्रो येषामुपधाने
ष्टकासमर्थः ऋष्टीः उपदधाति प्राणभृतः उपदधाति इमा वै तासु ऋष्यादिपदवन्मन्त्रो येषामिष्टकानामृष्यादिपदानो
लल्प्राबोध्याः ॥ अश्विमानण् ॥ अश्विमवल्लुक्ताकार्थेण् ॥ मतुपो लुक् च अश्विमानुपधानीयो मन्त्रो यासां ता आश्विनी
रुपदधाति ॥ वयस्यासु मूर्ध्नो मतुप् ॥ तद्वानासामिति मत्वर्थे प्रकृतिः मत्वविभावे तेमत्ववेता तन्मूर्धशब्दान्मतुप्स्या
त् प्रकृतेरन्तर्गतस्य मतुपो लुक् च वयः शब्दवन्मन्त्रो उपधेयासामिष्टकानां वयस्यासु मूर्धन्वतीः मूर्धशब्दो वयः

शाङ्गस्यानि नद्यपदेयपल्लवाभः मूर्धन्वतीरुपदधाति अनोप्युदितिवत्॥ मत्वर्थे मासतन्वोः॥ नभस्य प्राणिने
मयन नभसो मासः ओजस्यान् नूः॥ मधोर्ञ्च॥ मासतन्वोर्वा यत् मधुशब्दान्मत्वर्थे ञः चाद्यत् लुगपवादौ ना
त्न मधव्यः माधवः मधुर्वा मासः॥ माधव्या माधवा मधुर्वा तनूः॥ ओजसो हनि यत्खौ॥ ओजसा समस्मिनोजस्यमहः ओ
जसीनं वा॥ वेशोयशआदेर्भगाद्यल्खौ॥ वेशो भगशब्दाद्यल्॥ यशोभगशब्दाद्वा यल्खौ स्तानां यस्यां संबन्धे
इ यलखे वेति सम्बन्धविभक्तं पदं तिह्रुविकाराः वेशोभग्यः वेशोभगीनः यशोभग्यः यशोभगीनः॥ ख च॥ ख च कृतमि
नयोश्च॥ पूर्वैः कृतमिनियौ च॥ गंभीरेभिः पथिभिः पूर्विणेभिः येते पन्थाः सवितः पूर्व्यासः॥ अन्नैः संस्कृतम्॥
अन्नशब्दाद्यस्मात्कृतमित्यर्थे ... सहस्रेण सम्मितो घः॥ सहस्रियासो अपां नोर्मयः सहस्रेण तुल्य इत्य
र्थः॥ मतौ च॥ मत्वर्थे घो मत्वर्थे ... तपः सहस्राभ्यामिति ... सहस्रमस्यास्ति सहस्रियः॥ सो २१
ममर्हति यः॥ सोममर्हन्ति याज्ञिकाः ... मये च॥ प्रागत विकारावयवप्रकृतिश्च मयट्॥ इत्थं सोममयः सौ
म्यमधु सोममयमिमयः॥ पञ्चमी षष्ठी यथायोग्यमेति समर्थविभक्तयो बोध्याः भाषायां सोममयश्च ... मयः॥ श्रा
तोर्दिनाः॥ तत्र साधु ... नियहाओ ... अन्॥ मधोः॥ यस्तिति ... मधव्या लोकाः
मधुमयादि मत्वर्थे॥ वसोः समूहे च॥ वासव्यः ... समूहो विकारादि वा॥ अक्षरसमूहे छन्दस उपसंख्यानम्॥
अक्षरसमूह इत्यर्थे छन्दः ... गायत्र्यादि ... ओश्रावयेति चतुरक्षरं अस्तुश्रौषडिति चतुरक्षरं येयजामहे इति पं
चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरः छन्दस्यः वसोरिति योगविभागात् स्वार्थे पि
यत् हस्तो हरण्यवसुः वृष्णिर्वसव्यैः॥ अग्निरीशे वसव्यस्येति॥ नक्षत्राद्धः॥ स्वार्थे नक्षत्रियेभ्यः स्वाहा॥ सर्वदेवात्ताति
ल्॥ स्वार्थे सर्वतातिः देवतातिः॥ शिवशमरिष्टस्य करे॥ करोतीति कः शिवस्य करः शिवतातिः शंतातिः अरिष्ट

५
सि॰सु॰
२३
83

ताति: क्षेमंकरो विघ्नताति: शिवताति: शिवंकर: यपत्न: सर्वौषफलनं शिवताति स्य भवतु इति भवभूति: वा
यस्मात्सिविति निर्देशेन कोऽस्मानामपि प्रयोगानुसारेणाभाषार्थोऽसाधुत्वबोधनात् भावेच शिवस्य भाव: शिव
ताति: शंताति: अविघ्नताति: अविघ्नतातिमाऽस्माकं इति भवभूति: ॥ इति श्रीसिद्धांतसुधानिधौ चैत।
र्यांध्यायस्य चतुर्थ: पादोऽध्यायश्चायं समाप्त: ४ ॥ ॥ सद्विद्वत्सरस्वाकामानतिगमाहूपारपारे
गमस्त्रीलक्ष्मीधरलब्धबोधनतुणाविषेषेरणोदिते श्रीसिद्धांतसुधानिधौ स्फुपिपणेरध्यायमध्याय
तेऽध्यायेऽध्यायमिहाभिधेयमधुनाशोधाय धीधीयताम् ॥ ॐशुभम् ॥

सु. सि.
च. ४ +

स्वौजस्, मौट्, छष्, टाभ्यांभिस्, ङेभ्यांभ्यस्, ङसिभ्यांभ्यस्, ङसोसाम्, ङ्योस्सुप्, उक्ता प्रकृति
भ्यः परे स्वादयः प्रत्ययाः सुः, सु औ जस् इति प्रथमा अमौट् छष् इति द्वितीया टा भ्यां भिस् इति तृ
तीया ङे भ्यां भ्यस् इति चतुर्थी ङसि भ्यां भ्यस् इति पंचमी ङस् ओस् आम् इति षष्ठी ङि ओस् सुप्
इति सप्तमी इति संज्ञाः सर्वाचार्यसिद्धाः सुत्रकारस्य संमताः ताभिरेव व्यवहारात् सोरुकारो
वर्णः त्रसावित्यत्र विशेषणार्थः असौ सुक्ते असकारादावित्यर्थोपपत्त्या सप्तमी बहुवचने
पि पर्युदासापत्तेः नच्चेष्टापत्तिः वाजमर्वत्सु पयःसु स्त्रियास्त्वित्यादि विरोधात् ङसेरिकारो
युष्मदस्मद्भ्यां ङसोऽश् इत्यत्रैतदनुपादानार्थः टाङसिङसामित्येतदर्थो वा एकवचनस्यैव
त्यत्र पंचम्यनुवृत्त्या ङशाविधानेपि अर्थादेतद्ग्रहणोपपत्तेः जस्शसोर्जकारशकारौ ज
सः शी तस्माच्छसो नः इत्यनयोर्विषयविभागार्थौ अस इत्युक्ते सांकर्यप्रसंगात् जसो नानु
बंधत्वे औङ इत्यस्यादेशापत्त्या प्रत्ययत्वसंदेहापत्तेः शसो नानुबंधत्वे औटोजस्शसो न टस्य
ङत्वे ङित्वसंभावनास्यात् अतो नुसंदेहार्थं शकारः टडिति प्रत्याहारार्थः टाटकारः टाङसिङ
सामिति विशेषणार्थः ङिञोनकारो चेर्ङि (औटष्टकारः) नीत्ति विशेषणार्थः अंते पकारः
सुप्प्रत्याहारार्थः अवयवानुबंधज्ञापयं तेन सुपोद्वारान्त्वसिद्धिः ॥ + ५ सु. सि. च. ६ ॥

चतुर्थोऽध्याय ५९

प० ५८